# shrIhayagrIvasahasranAmAvaliH

# શ્રીહયગ્રીવસહસ્રનામાવલિઃ

## Document Information

Text title : hayagrIvasahasranAmAvaliH

File name : hayagrIvasahasranAmAvaliH.itx

Category : vishhnu, sahasranAmAvalI

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : March 10, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 29, 2021

*sanskritdocuments.org*

# શ્રીહયગ્રીવસહસ્રનામાવલિઃ

ૐ શ્રીહયગ્રીવાય નમઃ । શ્રીં હંસાય । હં હયગ્રીવાય ।
ઐં ૐ ક્લીમ્ । શ્રીયઃ શ્રિયૈ । શ્રીવિભૂષણાય । પરોરજસે । પરબ્રહ્મણે ।
ભૂર્ભુવસ્સુવરાદિમાય । ભાસ્વતે । ભગાય । ભગવતે । સ્વસ્તિ ।
સ્વાહા । નમઃ । સ્વધાયૈ । શ્રૌષટ્ । વૌષટ્ । નમઃ ॥ ૨૦

ૐ અલં નમઃ । હુમ્ । ફટ્ । હુમ્ । હ્રીમ્ । ક્રોમ્ । હ્લૌમ્ । કર્કગ્રીવાય ।
કલાનાથાય । કામદાય । કરુણાકરાય । કમલાધ્યુષિતોત્સઙ્ગાય ।
ક્ષ્ય કાલીવશાનુગાય । નિષદે । ઉપનિષદે । નીચૈઃ । ઉચ્ચૈઃ ।
સમમ્ । સહ । શશ્વત્ નમઃ ॥ ૪૦

ૐ યુગપત્ નમઃ । અહ્નાય । શનૈઃ । એકસ્મૈ । બહવે । ધ્રુવાય
ભૂતભૃતે । ભૂરિદાય । સાક્ષિણે । ભૂતાદયે । પુણ્યકીર્તનાય । ભૂમ્ને ।
ભૂમિરથોન્નદ્ધપુરુહૂતાય । પુરુષ્ટુતાય । પ્રફુલ્લપુણ્ડરીકાક્ષાય ।
પરમેષ્ઠિને । પ્રભાવનાય । પ્રભવે । ભર્ગાય ।
સતાં બન્ધવે નમઃ ॥ ૬૦

ૐ ભયધ્વંસિને નમઃ । ભવાપનાય । ઉધ્યતે । ઉરુશયાય । હુઙ્કૃતે ।
ઉરુગાયાય । ઉરુક્રમાય । ઉદારાય । ત્રિયુગાય । ત્ર્યાત્મને । નિદાનાય ।
નિલયાય । હરયે । હિરણ્યગર્ભાય । હેમાઙ્ગાય । હિરણ્યશ્મશ્રવે ।
ઈશિત્રે હિરણ્યકેશાય । હિમઘ્ને । હેમવાસસે નમઃ ॥ ૮૦

ૐ હિતૈષણાય નમઃ । આદિત્યમણ્ડલાન્તસ્સ્થાય । મોદમાનાય । સમૂહનાય ।
સર્વાત્મને । જગદાધારાય । સન્નિધયે । સારવતે । સ્વભુવે ।
ગોપતયે । ગોહિતાય । ગોમિને । કેશવાય । કિન્નરેશ્વરાય । માયિને ।
માયાવિકૃતિકૃતે । મહેશાનાય । મહામહસે । મ । મા નમઃ ॥ ૧૦૦

ૐ મિ । મી મુ । મૂ । મૃ । મૄ । મ્લૃ । મ્લૄ । મે । મૈ । મો । મૌ ।
બિન્દવે । વિસર્ગાય । હ્રસ્વાય । દીર્ઘાય । પ્લુતાય । સ્વરાય ।
ઉદાત્તાય । અનુદાત્તાય નમઃ ॥ ૧૨૦

ૐ સ્વરિતાય નમઃ । પ્રચયાય । કં । ખં । ગં ।
ઘં । ઙં । ચં । છં । જં । ઝં । ઞં ।
ટં । ઠં । ડં । ઢં । ણં । તં । થં । દં નમઃ ॥ ૧૪૦
ધં । નં । પં । ફં । બં । ભં । મં । યં । રં ।
ર્લં । વં । શં । ષં । સં । હં । લં । ક્ષં ।
યમાય । વ્યઞ્જનાય । જિહ્વામૂલીયાય નમઃ ॥ ૧૬૦

ૐ અર્ધવિસર્ગવતે । ઉપધ્માનીયાય । સંયુક્તાક્ષરાય । પદાય ।
ક્રિયાયૈ । કારકાય । નિપાતાય । ગતયે । અવ્યયાય । સન્નિધયે ।
યોગ્યતાયૈ । આકાઙ્ક્ષાયૈ । પરસ્પરસમન્વયાય । વાક્યાય । પદ્યાય ।
સમ્પ્રદાયાય । ભાવાય । શબ્દાર્થલાલિતાય । વ્યઞ્જનાયૈ ।
લક્ષણાયૈ નમઃ ॥ ૧૮૦

ૐ શક્ત્યૈ । પાકાય । રીતયે । અલઙ્કૃતયે । શય્યાયૈ ।
પ્રૌઢધ્વનયે । ધ્વનિમત્કાવ્યાય । સર્ગાય । ક્રિયાયૈ ।
રુચયે । નાનારૂપપ્રબન્ધાય । યશસે । પુણ્યાય । મહતે ધનાય ।
વ્યવહારપરિજ્ઞાનાય । શિવેતરપરિક્ષયાય । સદ્યઃ પરમનિર્વાણાય ।
પ્રિયપથ્યોપદેશકાય । સંસ્કારાય । પ્રતિભાયૈ નમઃ ॥ ૨૦૦

ૐ શિક્ષાયૈ નમઃ । ગ્રહણાય । ધારણાય । શ્રમાય । આશુતાયૈ ।
સ્વાદિમ્ને । ચિત્રાય । વિસ્તારાય । ચિત્રસંવિધયે । પુરાણાય । ઇતિહાસાય ।
સ્મૃતયે । સૂત્રાય । સંહિતાયૈ । આચારાય । આત્મનસ્તુષ્ટયે ।
આચાર્યાજ્ઞાનતિક્રમાય । શ્રીમતે । શ્રીગિરે । શ્રિયઃકાન્તાય નમઃ ॥ ૨૨૦

ૐ શ્રીનિધયે નમઃ । શ્રીનિકેતનાય । શ્રેયસે । હયાનનાય । શ્રીદાય ।
શ્રીમયાય । શ્રિતવત્સલાય । હંસાય । શુચિષદે । આદિત્યાય । વસવે ।
ચન્દ્રાય । અન્તરિક્ષસદે । હોત્રે । વેદિષદે । યોનયે । અતિથયે ।
દ્રોણસદે । હવિષે । નૃષદે ॥ ૨૨૦

ૐ મૃત્યવે નમઃ । વરસદે । અમૃતાય । ઋતસદે । વૃષાય ।
વ્યોમસદે । વિવિધસ્ફોટશબ્દાર્થવ્યઙ્ગ્યવૈભવાય । અબ્જાય । રસાય ।
સ્વાદુતમાય । ગોજાય । ગેયાય । મનોહરાય । ઋતજાય । સકલાય ।
ભદ્રાય । અદ્રિજાય । ઉત્તમસ્થૈર્યાય । ઋતાય ।
સમજ્ઞાયૈ નમઃ ॥ ૨૪૦

ૐ અનૃતાય નમઃ । બૃહત્સૂક્ષ્મવશાનુગાય । સત્યાય । જ્ઞાનાય ।
અનન્તાય । યતે । તતે । સતે । બ્રહ્મમયાય । અચ્યુતાય । અગ્રેભવતે ।
અગાય । નિત્યાય । પરમાય । પુરુષોત્તમાય । યોગનિદ્રાપરાય । સ્વામિને ।
નિધ્યાનપરનિર્વૃતાય । રસાય । રસ્યાય । રસયિત્રે નમઃ ॥ ૨૬૦

ૐ રસવતે નમઃ । રસિકપ્રિયાય । આનન્દાય । સર્વાન્ નન્દયતે । આનન્દિને ।
હયકન્ધરાય । કાલાય । કાલ્યાય । કાલાત્મને । કાલાભ્યુત્થિતાય ।
કાલજાગરાય । કાલસાચિવ્યકૃતે । કાન્તાકથિતવ્યાધિકાર્યકાય ।
દૃઙ્ન્યઞ્ચનોદ્યલ્લયાય । દૃગુદઞ્ચનોદ્યત્સર્ગાય । લઘુક્રિયાય ।
વિદ્યાસહાયાય । વાગીશાય । માતૃકામણ્ડલીકૃતાય ।
હિરણ્યાય નમઃ ॥ ૨૮૦

ૐ હંસમિથુનાય નમઃ । ઈશાનાય । શક્તિમતે । જયિને ।
ગૃહમેધિને । ગુણિને । શ્રીભૂનીલાલીલૈકલાલસાય ।
અઙ્કોદૂઢવાગ્દેવીકાયોપાશ્રિતાચાર્યકાય ।
વેદવેદાન્તશાસ્ત્રાર્થતત્ત્વવ્યાખ્યાનતત્પરાય । હ્લૌં । હ્લૂ । હંહં ।
હયાય । હંસૂં । હંસાં । હંસીં । હસૂં । હસૌં । હસૂંહં ।
હરિણાય નમઃ ॥ ૩૦૦

ૐ હારિણે નમઃ । હરિકેશાય । હરેડિતાય । સનાતનાય । નિબીજાય । સતે ।
અવ્યક્તાય । હૃદયેશયાય । અક્ષરાય । ક્ષરજીવેશાય । ક્ષમિણે ।
ક્ષયકરાયાચ્યુતાય । કર્ત્રે । કારયિત્રે । કાર્યાય । કારણાય ।
પ્રકૃતયે । કૃતયે । ક્ષયક્ષયમનસે । માર્થાય નમઃ ॥ ૩૨૦

ૐ વિષ્ણવે નમઃ । જિષ્ણવે । જગન્મયાય । સઙ્કુચતે । વિકચતે ।
સ્થાણવે । નિર્વિકારાય । નિરામયાય । શુદ્ધાય । બુદ્ધાય । પ્રબુદ્ધાય ।
સ્નિગ્ધાય । મુગ્ધાય । સમુદ્ધતાય । સઙ્કલ્પદાય । બહુભવતે ।
સર્વાત્મને । સર્વનામભૃતે । સહસ્રશીર્ષાય । સર્વજ્ઞાય નમઃ ॥ ૩૪૦

ૐ સહસ્રાક્ષાય । સહસ્રપદે । વ્યક્તાય । વિરાજે । સ્વરાજે ।
સમ્રાજે । વિષ્વગ્રૂપવપુષે । વિધવે । માયાવિને । પરમાનન્દાય ।
માન્યાય । માયાતિગાય । મહતે । વટપત્રશયાય । બાલાય । લલતે ।
આમ્નાયસૂચકાય । મુખન્યસ્તકરગ્રસ્તપાદાગ્રપટલાય । પ્રભવે ।
નૈદ્રીહાસાશ્વસમ્ભૂતજ્ઞાજ્ઞસાત્ત્વિકતામસાય નમઃ ॥ ૩૬૦

ૐ મહાર્ણવામ્બુપર્યઙ્કાય નમઃ । પદ્મનાભાય ।

પરાત્પરાય । બ્રહ્મભુવે । બ્રહ્મભયહૃતે । હરયે ।
ઓમુપદેશકૃતે । મધુકૈટભનિર્માથાય । મત્તબ્રહ્મમદાપહાય ।
વેધોવિલાપવાગાવિર્દયાસારાય । અમૃષાર્થદાય । નારાયણાસ્ત્રનિર્માત્રે ।
મધુકૈટભમર્દનાય । વેદકર્ત્રે । વેદભર્ત્રે । વેદાહર્ત્રે ।
વિદાં વરાય । પુઙ્ખાનપુઙ્ખહેષાઢ્યાય । પૂર્ણષાડ્ગુણ્યવિગ્રહાય ।
લાલામૃતકણવ્યાજ વાન્તનિર્દોષવર્ણકાય નમઃ ॥ ૩૮૦

ૐ ઉલ્લોલધ્વાનધીરોદ્યદુચ્ચૈર્હલહલધ્વનયે નમઃ ।
કર્ણા(ણ્ઠા)દારભ્ય કર્કાત્મને । કવયે । ક્ષીરાર્ણવોપમાય ।
શઙ્ખીને । ચક્રિણે । ગદિને । ખડ્ગિને । શાર્ઙ્ગિણે ।
નિર્ભયમુદ્રકાય । ચિન્મુદ્રાચિહ્નિતાય । હસ્તતલવિન્યસ્તપુસ્તકાય ।
શિષ્યભૂતવિધાશ્રીનિજવૈભવવેદકાય । અષ્ટાર્ણગમ્યાય ।
અષ્ટભુજાય । વ્યષ્ટિસૃષ્ટિકરાય । પિત્રે । અષ્ટૈશ્વર્યપ્રદાય ।
હૃષ્યદષ્ટમૂર્તિપિતૃસ્તુતાય । આનીતવેદપુરુષાય નમઃ ॥ ૪૦૦

ૐ વિધિવેદોપદેશકૃતે નમઃ ।
વેદવેદાઙ્ગવેદાન્તપુરાણસ્મૃતિમૂર્તિમતે । સર્વકર્મસમારાધ્યાય ।
સર્વવેદમયાય । વિભવે । સર્વાર્થતત્ત્વવ્યાખ્યાત્રે ।
ચતુષ્ષષ્ટિકલાધિપાય । શુભયુજે । સુમુખાય । શુદ્ધાય ।
સુરૂપાય । સુગતયે । સુધિયે । સુવૃતયે । સંવૃતયે । શૂરાય ।
સુતપસે । સુષ્ટુતયે । સુહૃદે । સુન્દરાય નમઃ ॥ ૪૨૦

ૐ સુભગાય નમઃ । સૌમ્યાય । સુખદાય । સુહૃદાં પ્રિયાય ।
સુચરિત્રાય । સુખતરાય । શુદ્ધસત્ત્વપ્રદાયકાય । રજસ્તમોહરાય ।
વીરાય । વિશ્વરક્ષાધુરન્ધરાય । નરનારાયણાકૃત્યા
ગુરુશિષ્યત્વમાસ્થિતાય । પરાવરાત્મને । પ્રબલાય । પાવનાય ।
પાપનાશનાય । દયાઘનાય । ક્ષમાસારાય । વાત્સલ્યૈકવિભૂષણાય ।
આદિકૂર્માય । જગદ્ભર્ત્રે નમઃ ॥ ૪૪૦

ૐ મહાપોત્રિણે નમઃ । મહીધરાય । મહીભિત્સ્વામિને । હરયે । યક્ષાય ।
હિરણ્યરિપવે । ઐચ્છિકાય । પ્રહ્લાદપાલકાય । સર્વભયહર્ત્રે ।
પ્રિયવદાય । શ્રીમુખાલોકનસ્રંસત્ક્રૌઞ્ચકાય । કુહકાઞ્ચનાય ।
છત્રિણે । કમણ્ડલુધરાય । વામનાય । વદતાંવરાય ।
પિશુનાત્મોશનોદૃષ્ટિલોપનાય । બલિમર્દનાય । ઉરુક્રમાય ।

બલિશિરોન્યસ્તાઙ્ઘ્રયે નમઃ ॥ ૪૬૦

ૐ બલિમર્દનાય નમઃ । જામદગ્ન્યાય । પરશુભૃતે ।
કૃત્તક્ષત્રકુલોત્તમાય । રામાય । અભિરામાય । શાન્તાત્મને ।
હરકોદણ્ડખણ્ડનાય । શરણાગતસન્ત્રાત્રે । સર્વાયોધ્યકમુક્તિદાય ।
સઙ્કર્ષણાય । મદોદગ્રાય । બલવતે । મુસલાયુધાય ।
કૃષ્ણાક્લેશહરાય । કૃષ્ણાય । મહાવ્યસનશાન્તિદાય ।
ઇઙ્ગાલિતોત્તરાગર્ભપ્રાણદાય । પાર્થસારથયે ।
ગીતાચાર્યાય નમઃ ॥ ૪૮૦

ૐ ધરાભારહારિણે નમઃ । ષટ્પુરમર્દનાય । કલ્કિને ।
વિષ્ણુયશસ્સૂનવે । કલિકાલુષ્યનાશનાય । સાધુપરિત્રાણ
વિહોતિદયાય । દુષ્કૃદ્વિનાશવિહિતોદયાય । પરમવૈકુણ્ઠસ્થાય ।
સુકુમારયુવાકૃતયે । વિશ્વોદયસઙ્કલ્પસ્વયમ્પ્રભવે ।
વિશ્વસ્થિતિસઙ્કલ્પસ્વયમ્પ્રભવે । વિશ્વધ્વંસઙ્કલ્પસ્વયમ્પ્રભવે ।
મદનાનાં મદનાય । મણિકોટીરમાનિતાય । મન્દારમાલિકાપીડાય ।
મણિકુણ્ડલમણ્ડિતાય । સુસ્નિગ્ધનીલકુટિલકુન્તલાય । કોમલાકૃતયે ।
સુલલાટાય । સુતિલકાય નમઃ ॥ ૫૦૦

ૐ સુભ્રૂકાય નમઃ । સુકપોલકાય । સદાસિદ્ધાય । સદાલોક-
સુધાસ્યન્દિરદચ્છદાય । તારકાકોરકાકારવિનિર્મિતરદચ્છદાય ।
સુધાવર્તિપરિસ્ફૂર્તિશોભમાનરદચ્છદાય । વિષ્ટબ્ધાય ।
વિપુલગ્રીવાય । નિભૃતોચ્ચૈશ્શ્રવસ્સિથતયે ।
સમાવૃત્તાવદાતોરુમુક્તાપ્રાલમ્બભૂષણાય । રત્નાઙ્ગદિને ।
વજ્રનિષ્કિણે । નીલરત્નાઙ્કકઙ્કણાય । હરિન્મણિગણાબદ્ધ
શ‍ૃઙ્ખલાકઙ્કણોર્મિકાય । સિતોપવીતસંશ્લિષ્યત્પદ્માક્ષમણિમાલિકાય ।
શ્રીચૂર્ણવદ્દ્વાદશોર્ધ્વપુણ્ડ્રરેખાપરિષ્કૃતાય ।
પટ્ટતન્તુગ્રથનવત્પવિત્રસરશોભિતાય । પીનવક્ષસે । મહાસ્કન્ધાય ।
વિપુલોરુકટીતટાય નમઃ ॥ ૫૨૦

ૐ કૌસ્તુભિને નમઃ । વનમાલિને । કાન્ત્યા ચન્દ્રાયુતોપમાય ।
મન્દારમાલિકામોદિને । મઞ્જુવાચે । અમલચ્છવયે । દિવ્યગન્ધાય ।
દિવ્યરસાય । દિવ્યતેજસે । દિવસ્પતયે । વાચાલાય । વાક્પતયે ।
વક્ત્રે । વ્યાખ્યાત્રે । વાદિનામ્પ્રિયાય । ભક્તહૃન્મધુરાય ।

વાદિજિહ્વાભદ્રાસનસ્થિતયે । સ્મૃતિસન્નિહિતાય । સ્નિગ્ધાય ।
સિદ્ધિદાય નમઃ ॥ ૫૪૦

ૐ સિદ્ધસન્નુતાય નમઃ । મૂલકન્દાય । મુકુન્દાય । ગ્લાવે । સ્વયમ્ભુવે ।
શમ્ભવે । ઐન્દવાય । ઇષ્ટાય । મનવે । યમાય । અકાલકાલ્યાય ।
કમ્બુકલાનિધયે । કલ્યાય । કામયિત્રે । ભીમાય । કાતર્યહરણાય ।
કૃતયે । સમ્પ્રિયાય । પક્કણાય । તર્કાય નમઃ ॥ ૫૬૦

ૐ ચર્ચાયૈ નમઃ । નિર્ધારણોદયાય । વ્યતિરેકાય । વિવેકાય ।
પ્રવેકાય । પ્રક્રમાય । ક્રમાય । પ્રમાણાય । પ્રતિભુવે । પ્રાજ્ઞાય ।
પથ્યાયૈ પ્રજ્ઞાયૈ । ધારણાય । વિધયે । વિધાત્રે । વ્યવધયે ।
ઉદ્ભવાય । પ્રભવાય । સ્થિતયે । વિષયાય । સંશયાય નમઃ ॥ ૫૮૦

ૐ પુર્વસ્મૈ પક્ષાય નમઃ । કક્ષ્યોપપાદકાય । રાદ્ધાન્તાય ।
વિહિતાય । ન્યાયફલનિષ્પત્તયે । ઉદ્ભવાય । નાનારૂપતન્ત્રાત્મને ।
વ્યવહાર્યાય । વ્યવસ્થિતયે । સર્વસાધારણાય દેવાય । સાધ્વસાધુહિતે
રતાય । સન્ધાયૈ । સનાતનાય ધર્માય । મહાત્મભિઃ ધર્મૈરર્ચ્યાય ।
છન્દોમયાય । ત્રિધામાત્મને । સ્વચ્છન્દાય । છાન્દસેડિતાય । યજ્ઞાય ।
યજ્ઞાત્મકાય નમઃ ॥ ૬૦૦

ૐ યષ્ટ્રે નમઃ । યજ્ઞાઙ્ગાય । અપઘનાય । હવિષે । સમિધે । આજ્યાય ।
પુરોડાશાય । શાલાયૈ । સ્થાલ્યૈ । સ્રુવાય । સ્રુગ્ભ્યો । પ્રાગ્વંશાય ।
દેવયજનાય । પરિધયે । પરિસ્તરાય । વેદયે । વિહરણાય । ત્રેતાયૈ ।
પશવે । પાશાય નમઃ ॥ ૬૨૦

ૐ સંસ્કૃતયે નમઃ । વિધયે । મન્ત્રાય । અર્થવાદાય । દ્રવ્યાય ।
અઙ્ગાય । દૈવતાય । સ્તોત્રાય । શસ્ત્રાય । સામ્ને । ગીતયે । ઉદ્ગીથાય ।
સર્વસાધનાય । યાજ્યાયૈ । પુરોઽનુવાક્યાયૈ । સામિધેન્યૈ । સમૂહનાય ।
પ્રયોક્તૃભ્યો । પ્રયોગાય । પ્રપઞ્ચાય નમઃ ॥ ૬૪૦

ૐ પ્રાશુભાશ્રમાય નમઃ । શ્રદ્ધાયૈ । પ્રધ્વંસનાયૈ । તુષ્ટયે ।
પુષ્ટયે । પુણ્યાય । પ્રતયે । ભવાય । સદસે । સદસ્યસમ્પાતાય ।
પ્રશ્નાય । પ્રતિવચસે । સ્થિતયે । પ્રાયશ્ચિત્તાય । પરિષ્કારાય ।
ધૃતયે । નિર્વહણાય । ફલાય । નિયોગાય । ભાવનાયૈ નમઃ ॥ ૬૬૦

ૐ ભાવ્યાય નમઃ । હિરણ્યાય । દક્ષિણાયૈ । નુતયે । આશિષે ।
અભ્યુપપત્તયે । તૃપ્તયે । સ્વાય શર્મણે કેવલાય । પુણ્યક્ષયાય ।

પુનઃપાતભયાય । શિક્ષાશુગર્દનાય । કાર્પણ્યાય । યાતનાયૈ ।
ચિન્તાયૈ । નિર્વેદાય । વિહસ્તતાયૈ । દેહભૃત્કર્મસમ્પાતાય ।
કિઞ્ચિત્કર્માનુકૂલકાય । અહેતુકદયાયૈ । પ્રેમ્ણે નમઃ ॥ ૬૮૦

ૐ સામ્મુખ્યાય નમઃ । અનુગ્રહાય । શુચયે । શ્રીમત્કુલજનાય ।
નેત્રે । સત્ત્વાભિમાનવતે । પિત્રોરન્તરાયહરાય । અદુષ્ટાહારદાયકાય ।
શુદ્ધાહારાનુરૂપાઙ્ગપરિણામવિધાયકાય । સ્રાવપાતાદિવિપદાં પરિહત્રે ।
પરાયણાય । શિરઃપાણ્યાદિસન્ધાત્રે । ક્ષેમકૃતે । પ્રાણદાય ।
પ્રભવે । અનિર્ઘૃણાય । અવિષમાય । શક્તિત્રિતયદાયકાય ।
સ્વેચ્છાપ્રસઙ્ગસમ્પત્તિવ્યાજહર્ષવિશેષવતે ।
સંવિત્સન્ધાયકાય નમઃ ॥ ૭૦૦

ૐ સર્વજન્મક્લેશસ્મૃતિપ્રદાય નમઃ । વિવેકવિધાયકાય ।
શોકવિધાયકાય । વૈરાગ્યવિધાયકાય । ભવભીતિ-
વિધાયકાય । ગર્ભસ્થ અનુકૂલાદિનાસાન્તાધ્યવસાયદાય ।
શુભવૈજનનોપેતસદનેહાય । જનિપ્રદાય । ઉત્તમાયુઃપ્રદાય ।
બ્રહ્મનિષ્ઠાનુગ્રહકારકાય । સ્વદાસજનનિસ્તીર્ણતદંશજપરમ્પરાય ।
શ્રીવૈષ્ણવોત્પાદકૃતસ્વસ્તિકાવનિમણ્ડલાય ।
આથર્વણોક્તૈકશતમૃત્યુદૂરક્રિયાપરાય । દયાદ્યષ્ટાગુણાધાત્રે ।
તત્તત્સંસ્કૃતિસાધકાય । મેધાવિધાત્રે । શ્રદ્ધાકૃતે । સૌસ્થ્યદાય ।
જામિતાહરાય । વિઘ્નનુદે નમઃ ॥ ૭૨૦

ૐ વિજયાધાત્રે નમઃ । દેશકાલાનુકૂલ્યકૃતે । વિનેત્રે । સત્પથાનેત્રે ।
દોષહૃતે । શુભદાય । સખ્યે । હ્રીદાય । ભીદાય । રુચિકરાય ।
વિશ્વાય । વિશ્વહિતે રતાય । પ્રમાદહૃતે । પ્રાપ્તકારિણે । પ્રદ્યુમ્નાય ।
બલવત્તરાય । સાઙ્ગવેદસમાયોક્ત્રે । સર્વશાસ્ત્રાર્થવિત્તિદાય ।
બ્રહ્મચર્યાન્તરાયઘ્નાય । પ્રિયકૃતે નમઃ ॥ ૭૪૦

ૐ હિતકૃતે નમઃ । પરાય । ચિત્તશુદ્ધિપ્રદાય । છિન્નાક્ષચાપલ્યાય ।
ક્ષમાવહાય । ઇન્દ્રિયાર્થરતિચ્છેત્રે । વિદ્યૈકવ્યસનાવહાય ।
આત્માનુકૂલ્યરુચિકૃતે । અખિલાર્તિવિનાશકાય । તિતીર્ષુહૃત્ત્વરાવેદિને ।
ગુરુસદ્ભક્તિતેજનાય । ગુરુસમ્બન્ધઘટકાય । ગુરુવિશ્વાસવર્ધનાય ।
ગુરૂપાસનાસન્ધાત્રે । ગુરુપ્રેમપ્રવર્ધનાય । આચાર્યાભિમતૈર્યોક્ત્રે ।
પઞ્ચસંસ્કૃતિભાવનાય । ગુરૂક્તવૃત્તિનૈશ્ચલ્યસન્ધાત્રે ।

અવહિતસ્થિતયે । આપન્નાખિલરક્ષાર્થાય નમઃ ॥ ૭૬૦

ૐ આચાર્યકમુપાશ્રિતાય નમઃ । શાસ્ત્રપાણિપ્રદાનેન ભવમગ્નાન્
સમુદ્ધરતે । પાઞ્ચકાલિકધર્મેષુ નૈશ્ચલ્યં યતેપ્રતિપાદકાય ।
સ્વદાસારાધનાદ્યર્થશુદ્ધદ્રવ્યપ્રદાયકાય । ન્યાસવિદ્યાવિનિર્વોઢ્રે ।
ન્યસ્તાત્મભરરક્ષકાય । સ્વકૈઙ્કર્યૈકરુચિદાય ।
સ્વદાસ્યપ્રેમવર્ધનાય । આચાર્યાર્થખિલદ્રવ્યસમ્ભૃત્યર્પણરોચકાય ।
આચાર્યસ્ય સ્વસચ્છિષ્યોજ્જીવનૈકરુચિપ્રદાય । આગત્ય યોજયતે ।
દાસહિતૈકકૃતિજાગરાય । બ્રહ્મવિદ્યાસમાસ્વાદસુહિતાય ।
કૃતસંસ્કૃતયે । સત્કારે વિષધીદાત્રે । તરુણ્યાં શવબુદ્ધિદાય ।
સભાં વ્યાલીં પ્રત્યાયયતે । સર્વત્ર સમબુદ્ધિદાય ।
સમ્ભાવિતાશેષદોષહૃતે । પુનર્ન્યાસરોચકાય નમઃ ॥ ૭૮૦

ૐ મહાવિશ્વાસસન્ધાત્રે નમઃ । સ્થૈર્યદાત્રે । મદાપહાય ।
વાદવ્યાખ્યાસ્વસિદ્ધાન્તરક્ષાહેતુસ્વમન્ત્રદાય ।
સ્વમન્ત્રજપસંસિદ્ધિજઙ્ઘાલકવિતોદયાય ।
અદુષ્ટગુણવત્કાવ્યબન્ધવ્યામુગ્ધચેતનાય ।
વ્યઙ્ગ્યપ્રધાનરસવદ્ગદ્યપદ્યાદિનિર્મિતયે । સ્વભક્તસ્તુતિસન્તુષ્ટાય ।
ભૂયોભક્તિપ્રદાયકાય । સાત્ત્વિકત્યાગસમ્પન્નસત્કર્મકૃદતિપ્રિયાય ।
નિરન્તરાનુસ્મરણનિજદાસૈકદાસ્યકૃતે । નિષ્કામવત્સલાય ।
નૈચ્યભાવનેષુ વિનિર્વિશતે । સર્વભૂતભવદ્ભાવં
સમ્પશ્યત્સુ સદાસ્થિતાય । કરણત્રયસારૂપ્યકલ્યાણવતિ
સાદરાય । કદાકદેતિકૈઙ્કર્યકામિશેષિતાં ભજતે ।
પરવ્યૂહાદિનિર્દોષશુભાશ્રયપરિગ્રહાય ।
ચન્દ્રમણ્ડલમધ્યસ્થશ્વેતામ્ભોરુહવિષ્ટરાય ।
જ્યોત્સ્નાયમાનાઙ્ગરુચિનિર્ધૂતાન્તર્બહિસ્તમસે । ભાવ્યાય નમઃ ॥ ૮૦૦

ૐ ભદ્રભાવયિત્રે નમઃ । પારિજાતવનાલયાય ।
ક્ષીરાબ્ધિમધ્યમદ્વીપપાલકાય । પ્રપિતામહાય ।
નિરન્તરનમોવાકશુદ્ધયાજિહૃદાશ્રયાય ।
મુક્તિદશ્વેતમૃદ્રૂપશ્વેતદ્વીપવિભાવનાય ।
ગરુડાહારિતશ્વેતમૃત્પૂતયદુભૂધરાય । ભદ્રાશ્વવર્ષનિલયાય ।
ભયહારિણે । શુભાશ્રયાય । ભદ્રશ્રીવત્સહારાઢ્યાય ।
પઞ્ચરાત્રપ્રવર્તકાય । ભક્તાત્મભાવભવનાય । હાર્દાય ।

અઙ્ગુષ્ઠપ્રમાણવતે । સ્વદાસસત્કૃત્યાકૃત્યે તન્મિત્રારિષુ
યોજયતે । પ્રાણાનુત્ક્રામયતે । ઊરીકૃતપ્રારબ્ધલોપનાય ।
લઘુશિક્ષાનિર્ણુન્નાશેષપાપાય । ત્રિસ્થૂણક્ષોભતો ભૂતસૂક્ષ્મૈઃ
સૂક્ષ્મવપુસ્સૃજતે નમઃ ॥ ૮૨૦

ૐ નિરઙ્કુશકૃપાપૂરાય નમઃ । નિત્યકલ્યાણકારકાય । મૂર્ધન્યનાડ્યા
સ્વાન્દાસાન્ બ્રહ્મરન્ધ્રાદુદઞ્ચયતે । ઉપાસનપરાન્ સર્વાન્
પ્રારબ્ધમનુભાવયતે । સર્વપ્રારબ્ધદેહાન્તેઽપિ અન્તિમસ્મરણં
દિશતે । પ્રપેદુષાં ભેજુષાં ચ યમદૃષ્ટિમભાવયતે ।
દિવ્યદેહપ્રદાય । મોક્ષમેયુષાં સૂર્યં દ્વારયતે ।
આતિવાહિકસત્કારાન્ અધ્વન્યાપાદ્ય માનયતે । સર્વાન્ ક્રતુભુજઃ
શશ્વત્ પ્રાભૃતાનિ પ્રદાપયતે । દુરન્તમાયાકાન્તારં દ્રુતં
યોગેન લઙ્ઘયતે । સ્ફાયત્સુદર્શવિવિધવીથ્યન્તેનાધ્વના
નયતે । સીમાન્તસિન્ધુવિરજાં યોગેનોત્તારયતે । વશિને ।
અમાનવસ્ય દેવસ્ય કરં શિરસિ ધારયતે । અનાદિવાસનાં ધૂન્વતે ।
વૈકુણ્ઠાપ્ત્યા સલોકયતે । અહેયમઙ્ગલોદારતનુદાનાત્ સરૂપયતે ।
સૂરિજુષ્ટસુખૈકાન્તપરમપદમાપયતે । અરણ્યં અમૃતામ્ભોધી
દર્શયતે નમઃ ॥ ૮૪૦

ૐ શ્રમનાશનાય નમઃ । દિવ્યોદ્યાનસરોવાપીસરિન્મણિનગાન્ નયતે ।
ઐરમ્મદામૃતસરો ગમયતે । સૂપબૃંહણાય । અશ્વત્થં સોમસવનં
પ્રાપયતે । વિષ્ટરશ્રવસે । દિવ્યાપ્સરસ્સમાનીત બ્રહ્માલઙ્કારદાયકાય ।
દિવ્યવાસોઽઞ્જનક્ષૌમમાલ્યૈઃ સ્વાન્ બહુ માનયતે । સ્વીયાં
અયોધ્યાં નગરીં સાદરં સમ્પ્રવેશયતે । દાસાન્ દિવ્યરસાલોક
ગન્ધાંસલશરીરયતે । સ્વદાસાન્ સૂરિવર્ગેણ સસ્નેહં બહુમાનયતે ।
સૂરિસેવોદિતાનન્દનૈચ્યાન્ સ્વાનતિશાયયતે । સ્વાં નમો વીપ્સાં વાચયતે ।
પ્રહ્વાન્ કૃતાઞ્જલીન્ કુર્વતે । પ્રાકારગોપુરારામપ્રાસાદેભ્યઃ પ્રણામયતે ।
ઇન્દ્રપ્રજાપતિદ્વારપાલસમ્માનમાપયતે । માલિકાઞ્ચન્મહારાજવીથીમધ્યં
નિવાસયતે । શ્રીવૈકુણ્ઠપુરન્ધ્રીભિઃ નાનાસત્કારકાય દિવ્યં વિમાનં
ગમયતે । બ્રહ્મકાન્ત્યાઽભિપૂરયતે નમઃ ॥ ૮૬૦

ૐ મહાનન્દાત્મકશ્રીમન્મણિમણ્ડપમાપયતે ।
હૃષ્યત્કુમુદચણ્ડાદ્યૈર્વિષ્વક્સેનાન્તિકં નયતે ।
સેનેશચિદિતાસ્થાનનાયકાય । હેતિનાયકાય । દિવ્યમાસ્થાનં પ્રાપયતે ।

વૈનતેયં પ્રણામયતે । શ્રીમત્સુન્દરસૂરીન્દ્રદિવ્યપઙ્ક્તિં પ્રણામયતે ।
ભાસ્વરાસનપર્યઙ્કપ્રાપણેન કૃતાર્થયતે । પર્યઙ્કવિદ્યાસંસિદ્ધ-
સર્વવૈભવસઙ્ગતાય । સ્વાત્માનમેવ શ્રીકાન્તં સાદરં ભૂરિ
દર્શયતે । શેષતૈકરતિં શેષં શય્યાત્માનં પ્રણામયતે ।
અનન્તાક્ષિદ્વિસાહસ્રસાદરાલોકપાત્રયતે । અકુમારયુવાકારં શ્રીકાન્તં
સમ્પ્રણામયતે । અતટાનન્દતો હેતોઃ કિલિકિઞ્ચિતમઞ્ચયતે ।
દાસાનત્યુત્થિતિમુહુઃકૃતિદૃષ્ટિપ્રસન્નહૃતે । શ્રિયં પ્રાપ્તં
સ્વયં તાતં જીવં પુત્રં પ્રહર્ષયતે । સ્વસુખામ્ભોધૌ મજ્જયતે ।
સ્વકકીર્તિરુચિં દિશતે । દયાર્દ્રાપાઙ્ગવલનાકૃતાહ્લાદૈઃ
કૃતાર્થયતે ।
પર્યઙ્કારોહણપ્રહ્વં લક્ષ્મ્યા સમમુપપાદયતે નમઃ ॥ ૮૦

ૐ કસ્ત્વમિત્યનુયુઞ્જાનાય નમ । દાસોઽસ્મીત્યુક્તિવિસ્મિતાય ।
અપૃથક્ત્વપ્રકારોઽસ્મિ વાચા સ્વાશ્રિતવદ્ભવતે । વિદુષાં તત્ક્રતુનયાત્ ।
હયાસ્યવપુષા ભવતે । વાસુદેવાત્મના ભૂયો ભવતે । વૈકુણ્ઠનાયકાય ।
જગન્મોહનમૂર્તિમતે । યથાતથૈવ સ્વરૂપં પ્રકાશયતે ।
દ્વિમૂર્તી પ્રકાશયતે । બહુમૂર્તીઃ પ્રકાશયતે । યથાતથૈવ સ્વરૂપં
પ્રકાશયતે । દ્વિમૂર્તી પ્રકાશયતે । બહુમૂર્તીઃ પ્રકાશયતે । સ્વાત્મનઃ
પ્રકાશયતે । યુગપત્ સકલં સાક્ષાત્સ્વતઃ કર્તું સમર્થયતે ।
કવીનાં નિત્યમાદિશતે । મુક્તાનામાદિમાય કવયે । ષડર્ણમનુનિષ્ઠાનાં
શ્વેતદ્વીપસ્થિતિં દિશતે । દ્વાદશાક્ષરનિષ્ઠાનં સન્તાનિકં
લોકં દિશતે । અષ્ટાક્ષરૈકનિષ્ઠાનાં કાર્યં વૈકુણ્ઠમર્પયતે ।
શરણાગતિનિષ્ઠાનાં સાક્ષાદ્વૈકુણ્ઠમર્પયતે । સ્વમન્ત્રરાજનિષ્ઠાનાં
સ્વસ્માદતિશયં દિશતે । શ્રિયા ગાઢોપગૂઢાત્મને નમઃ ॥ ૯૦૦

ૐ ભૂતધાત્રીરુચિં દિશતે નમઃ । નીલાવિભૂતિવ્યામુગ્ધાય ।
મહાશ્વેતાશ્વમસ્તકાય । ત્ર્યક્ષાય । ત્રિપુરસંહારિણે । રુદ્રાય ।
સ્કન્દાય । વિનાયકાય । અજાય । વિરિઞ્ચાય । દ્રુહિણાય । વ્યાપ્તમૂર્તયે ।
અમૂર્તિકાય । અસઙ્ગાય । અનન્યધીસઙ્ગવિહઙ્ગાય । વૈરિભઙ્ગદાય ।
સ્વામિને । સ્વસ્મૈ । સ્વેન સન્તુષ્યતે । શક્રાય નમઃ ॥ ૯૨૦

ૐ સર્વાધિકસ્યદાય નમઃ । સ્વયઞ્જ્યોતિષે । સ્વયંવેદ્યાય ।
શૂરાય । શૂરકુલોદ્ભવાય । વાસવાય । વસુરણ્યાય । અગ્નયે ।
વાસુદેવાય । સુહૃદે । વસવે । ભૂતાય । ભાવિને । ભવતે । ભવ્યાય ।

વિષ્ણુસ્થાનાય । સનાતનાય । નિત્યાનુભાવાય । નેદીયસે ।
દવીયસે નમઃ ॥ ૯૪૦

ૐ દુર્વિભાવનાય નમઃ । સનત્કુમારાય । સન્ધાત્રે । સુગન્ધયે ।
સુખદર્શનાય । તીર્થાય । તિતિક્ષવે । તીર્થાઙ્ઘ્રયે ।
તીર્થસ્વાદુશુભાય । શુચયે । વીર્યવદ્દીધિતયે । તિગ્મતેજસે ।
તીવ્રાય । અનામયાય । ઈશાદ્યુપનિષદ્વેદ્યાય । પઞ્ચોપનિષદાત્મકાય ।
ઈશે । અન્તઃસ્થાય । દૂરસ્થાય । કલ્યાણતમરૂપવતે નમઃ ॥ ૯૬૦

ૐ પ્રાણાનાં પ્રાણનાય નમઃ । પૂર્ણજ્ઞાનૈરપિ સુસુદુર્ગ્રહાય ।
નાચિકેતોપાસનાર્ચ્યાય । ત્રિમાત્રપ્રણવોદિતાય । ભૂતયોનયે ।
સર્વજ્ઞાય । અક્ષરાય । અક્ષરપરાત્પરાય । અકારાદિપદજ્ઞેયવ્યૂહાય ।
તારાર્થપૂરુષાય । મનોમયાય । અમૃતાય । નન્દમયાય ।
દહરરૂપધૃતે । ન્યાસવિદ્યાવેદ્યરૂપાય । આદિત્યાન્તર્હિરણ્મયાય ।
ઇદન્દ્રાય । આત્મને । ઉદ્ગીથાદિપ્રતીકોપાસનાન્વયિને ।
મધુવિદ્યોપાસનીયાય નમઃ ॥ ૯૮૦

ૐ ગાયત્રીધ્યાનગોચરાય નમઃ । દિવ્યકૌક્ષેયસજ્જ્યોતિષે ।
શાણ્ડિલ્યોપાસ્તિવીક્ષિતાય । સંવર્ગવિદ્યાવેદ્યાત્મને ।
પરસ્મૈ ષોડશકલાય । તસ્મૈ । ઉપકોસલવિદ્યેક્ષ્યાય ।
પઞ્ચાગ્ન્યાત્મશરીરકાય । વૈશ્વાનરાય । સતે । ભૂમ્ને । જગત્કર્મણે ।
આદિપૂરુષાય । મૂર્તામૂર્તબ્રહ્મણે । સર્વપ્રેષ્ઠાય । અન્યપ્રિયતાકારાય ।
સર્વાન્તરાય । અપરોક્ષાય । અન્તર્યામિણે । અમૃતાય ।
અનઘાય । અહર્નામાદિત્યરૂપાય નમઃ ॥ ૧૦૦૦

ૐ અહન્નામાક્ષિસંશ્રિતાય નમઃ । સતુર્યગાયત્ર્યર્થાય ।
યથોપાસ્ત્યાપ્યસદ્વપુષે । ચન્દ્રાદિસાયુજ્યપૂર્વમોક્ષદન્યાસગોચરાય ।
ન્યાસનાશ્યાનભ્યુપેતપ્રારબ્ધાંશાય । મહાદયાય ।
અવતારરહસ્યાદિજ્ઞાનિપ્રારબ્ધનાશનાય । સ્વેન સ્વાર્થં પરેણાપિ ન્યાસે
કૃતે ફલપ્રદાય । અસાહસાય । અનપાયશ્રિયે । સસહાયાય ।
શ્રિયૈવ સતે । શ્રીમન્નારાયણાય । વાસુદેવાય । વિષ્ણવે ।
ઉત્તમાય નમઃ ॥ ૧૦૧૬

શ્રીમતે હયગ્રીવાય નમઃ ।

ઇતિ શ્રીહયગ્રીવસહસ્રનામાવલિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*shrIhayagrIvasahasranAmAvaliH*

pdf was typeset on August 29, 2021

Please send corrections to *sanskrit@cheerful.com*